## ऐ औ च्। (मा.सू. ४)

ऐ औ इत्येतौ वर्णावुप[1]दिश्य पूर्वांश्चान्ते चकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति चतुर्भिः। 'अचः परस्मिन् पूर्वविधौ' (१.१.५७/५०) इत्यकारेण। 'इच एकाचोऽम्प्रत्ययवच्च' (६.३.६८/२९९४) इति इकारेण। '[2]एचोऽयवायावः' (६.१.७८/६१) इति एकारेण। 'वृद्धिरादैच्' (१.१.१/१६) इति ऐकारेण।

[3]प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः॥ (म.भा. १.३२)

वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति, तच्छायानुकारिणो हि ते न पुनस्त एव। पृथक्प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः।

[१.] [4]नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम् (म.भा. १.११)।

नुड्विधौ (७.४.७१/२२८८) ऋकारग्रहणम्। आनृधतुः, आनृधुः। लादेशे (८.२.१८/२३५०) ऋकारग्रहणम्। क्लृप्तः, क्लृप्तवान्। विनामे (८.४.१/२३५) ऋकारग्रहणम्। कर्तॄणाम्॥

## ह य व र ट्। (मा.सू. ५)

ह य व र इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते टकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन। 'शश्छोऽटि' (८.४.६३/१२०) इत्यकारेण। अयं [5]रेफो [6]यकारात् पर उपदिश्यते। तस्य[7] यर्ग्रहणेन यय्ग्रहणेन च[8] ग्रहणे सति, [9]स्वर्नयति, प्रातर्नयति इत्यत्र 'यरोऽनुनासिकेऽनुनासिको वा' (८.४.४५/११६) इति अनुनासिकः प्राप्नोति। मद्रह्लदः, भद्रह्लदः इत्यत्र[10] द्विर्वचनं प्राप्नोति 'अचो रहाभ्यां द्वे' (८.४.४६/५९) इति। कुण्डं[11] रथेन, वनं रथेन (म.भा. १. २८) इत्यत्र 'अनुस्वारस्य[12] ययि परसवर्णः' (८.४.५८/१२४) इति परसवर्णः[13] प्राप्नोति। नैष दोषः। आकृतौ[14] पदार्थे समुदाये [15]सकृल्लक्ष्ये लक्षणं प्रवर्तते (भाष्यदी. ८०.३) इत्येतस्मिन् दर्शने '[16]यरोऽनुनासिकेऽनुनासिको वा' (८.४.४५/११६) [17]अन्तरतमो भवति इत्येवमेतत् प्रवर्तते। तदनेन गकारादीनां ङकारादयो ये [18]यथास्वं स्थानतो गुणतश्च अन्तरतमाः, ते सर्वे[19] विहिताः। ये तु[20] न स्थानतः, नापि गुणतः, स्थानमात्रेण[21] गुणमात्रेण वा अन्तरतमास्ते सर्वे निवर्तिताः इति [22]स्थानमात्रान्तरतमो रेफस्य णकारो न[23] भवति। द्विर्वचनेऽपि रेफस्य यरन्तर्भावे सति यर्कार्यं प्राप्तम्, तत् साक्षाच्छिष्टेन निमित्तभावेन बाध्यते इति न द्विरुच्यते रेफः। 'अनुस्वारस्य ययि परसवर्णः' (८.४.५८/१२४) इत्येदतप्यनुस्वारान्तरतमं सकृदेव परसवर्णं विदधाति। न च रेफस्यानुस्वारान्तरतमः सवर्णोऽस्ति इति[24] [25]न भविष्यति कुण्डं रथेन, [26]वनं रथेन इत्यत्र।

अटां[27] मध्ये विसर्जनीयजिह्वामूलीयोपध्मानीयानामप्युपदेशः कर्तव्यः। किं प्रयोजनम्? उर≍केण, उरःकेण। उर≍पेण, उरःपेण[28]। अत्र 'अड्व्यवाये' (८.४.२/१९७) इति णत्वं यथा स्यात् इति[29] (म.भा. १.२७–२९)॥

---

1. उपदिश्येते ह. 2. एषा पङ्क्तिः नास्ति ह. 3. प्रत्याहारानुबन्धानां फ, प्रत्याहारेण ग. 4. नुड्विधि–क्लृप्तवान् नास्ति फ, अड्विधिलादेशविधीनां प्रतिविधानं कर्तव्यम् ह. 5. अन्यरेफो ग. 6. मकारात् ब, यक्कारात् ग. 7. च अ. 8. च नास्ति ई. 9. स्वर्णयति ई, प्रातर्णयति ई.ग, नास्ति ब.फ. 10. अचो रहाभ्यां द्वे इति अ. 11. कुण्ठं ड, वनं रथेन नास्ति क. 12. अनुस्वारस्य इति ग. 13. परसवर्णत्वं ग. 14. हि ह, आक्षप्तौ ई. 15. सकृल्लक्षणा ग, सकृल्लक्षणं ह. 16. यरो –विहिताः नास्ति ग. 17. इति ग. 18. यथास्वं नास्ति ग. 19. सर्वे नास्ति ग. 20. अपि फ, पुनर् न ड. 21. स्थानमात्रेऽपि ग, स्थानमात्रेण वा ह. 22. स्थानमात्रेण क.ह. 23. न नास्ति ह. 24. सः ह. 25. परसवर्णः क. ग. 26. वनं रथेन नास्ति ड. फ. 27. अण्मध्ये ग. 28. इति ग. 29. इति नास्ति ग.